**संस्कृतवार्ता:**

**दिनाङ्क :- 01/02/2025** **सायम् - 06:20**

**आदौ मुख्यवार्ताः**

- वित्तमन्त्री निर्मला सीतारामन् अद्य एन०डी०ए० इत्येतस्य प्रशासनस्य प्रथमं पूर्ण-वित्तसङ्कल्पनापत्रम् उपस्थापितवती ; उक्तवती च यत् अनया नूतन-संरचनया मध्यमवर्गस्य कृते कर: न्यून: भविष्यति, तेषां पार्श्वे अधिकं धनम् अवशिष्टं भविष्यति।
- वित्तमन्त्रिणा उद्घोषितं यत् अधुना द्वादश-लक्षरूप्यकाणि आयपर्यन्तं करस्तर: शून्यं भविष्यति।
- प्रधानमन्त्रिणा नरेन्द्रमादिना उदीरितं यत् आय-व्यय-पत्रकं पञ्चविंशत्युत्तर द्विसहस्रत: षड्विंशति-सत्रं देशस्य चत्वारिंशद-धिकैक-शतकोटि-भारतीयानां आकांक्षाणां प्रपूर्तेः आश्वासनं प्रदर्शयति।
- राष्ट्रपति-पदासीना द्रौपदी मुर्मु: अद्य नवदिल्ल्या: **भारत-मण्डपम** इत्यत्र अस्य वर्षस्य विश्व-पुरस्तक-मेलकस्य उद्घाटनं कृतवती।
- हॉकी इण्डिया लीग इति स्पर्धाया: अन्त्यचक्रे अद्य हैदराबाद तूफान्स इत्येतत् दलं श्राची राढ़ बंगाल टाइगर्स दलं सम्मुखीकरिष्यति।

**अथ वार्ताः विस्तरेण**

**वित्तसङ्कल्पना पत्र**

वित्तमन्त्री निर्मला सीतारामन् अद्य एन०डी०ए० इत्येतस्य प्रशासनस्य प्रथमं पूर्ण-वित्तसङ्कल्पनापत्रम् उपस्थापितवती। लोकसभायां वित्तमन्त्रिणा उद्घोषितं यत् अधुना द्वादश-लक्षरूप्यकाणि आयपर्यन्तं करस्तर: शून्यं भविष्यति। एषा नूतन-करग्रहण-व्यवस्थायां नूतन-आयकर-स्तरान् अपि प्रावर्तयत्।

असौ उक्तवती यत् अनया नूतन-संरचनया मध्यमवर्गस्य कृते कर: न्यून: भविष्यति, तेषां पार्श्वे अधिकं धनम् अवशिष्टं भविष्यति। वरिष्ठनागरिकेभ्य: ऋणवृद्धौ कर-व्यवकलनस्य सीमा पञ्चाशत्-सहस्रात् द्विगुणितं कृत्वा एकलक्षं यावत् कृता। वित्तमन्त्रिणा राज्यै: सह सहभागितायां

कृषिक्षेत्राय एक: कार्यक्रम: “प्रधानमन्त्री धन-धान्य-कृषि-योजना” इत्येष: उद्घोषित:। असौ उक्तवती यत् वर्तमान-योजनानाम् अभिसरणेन सह अयं कार्यक्रम: शत-जनपदानां न्यूनोत्पादकता सस्य-विविधीकरणं च व्याप्तं करष्यिति। वित्तमन्त्रिणा निर्मला सीतारामन् इत्यनया उद्घोषितं यत् पञ्चलक्ष-महिलानाम्, अनुसूचित-जातीनाम् अनुसूचित-जनजातीनाञ्च प्रथम-उद्यमशीलेभ्य: एका नूतन-योजना आरप्स्यते। अनया योजनया आगामि-पञ्च-वर्षावधौ द्विकोटि-रूप्यकाणि यावत् सावधि-ऋणं प्रदास्यते।

**<u>प्रधानमन्त्री</u>**

प्रधानमन्त्रिणा नरेन्द्रमादिना उदीरितं यत् आय-व्यय-पत्रकं पञ्चविंशत्युत्तर द्विसहस्रत: षड्विंशति-सत्रं देशस्य चत्वारिंशद-धिकैक-शतकोटि-भारतीयानां आकांक्षाणां प्रपूर्ते: आश्वासनं प्रदर्शयति। आय-व्यय-पत्रकात् परं संदेश-पुटके तेन प्रोक्तं यत् एषा भारतस्य प्रगतौ महत्त्वपूर्णा विकास यात्रा भविष्यति। मोदी उक्तवान् यत् एतत् आय-व्यय-पत्रकं प्रत्येकं भारतीयस्य स्वप्नान् प्रपूरयिष्यति।

**बाइट-नरेन्द्र मोदी ऑन ग्रोथ**

श्रीमोदी एतदपि उक्तवान् यत् आय-व्यय पत्रकेण देशस्य मध्यवर्तिन: जना: लाभान्विता: भविष्यन्ति। द्वादशलक्षरूप्यकाणि यावत् आयवन्त: जना: करात् बहि: सन्ति। अनेन कृषि-क्षेत्रं ग्रामीणार्थव्यवस्था इत्यादय: च सशक्ता: भविष्यन्ति।

**<u>विराम:</u>**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**<u>विश्व-पुरस्तक-मेलकम्</u>**

राष्ट्रपति-पदासीना द्रौपदी मुर्मु: उक्तवती यत् पुस्तकानां पठनं न केवलम् अभिरुचि: अपितु परिवर्तनशील: अनुभव: अस्ति। अद्य अपराह्णे नवदिल्ल्या: **भारत-मण्डपम** इत्यत्र अस्य वर्षस्य विश्व-पुरस्तक-मेलकस्य उद्घाटनं कुर्वती राष्ट्रपति: मुर्मु: उक्तवती यत् विभिन्न-भाषाणां संस्कृतीनां च पुस्तकानां पठनेन क्षेत्राणां समुदायानां च मध्ये सेतो: निर्माणं भवति। राष्ट्रपति: बालानां कृते पुस्तकानां निर्माणाय तस्य प्रचाराय च विशिष्टं महत्त्वं प्रदातुं सर्वेभ्य: प्रार्थयत्। असौ उक्तवती यत् अस्मिन् वर्षे मेलकस्य विषय: गत-पञ्चसप्तति-वर्षेषु गणराज्यरूपेण भारतस्य यात्रां प्रकाशयति। नवदिवसीय-मेलके अस्मिन् फ्रांस, अर्जेण्टीना, स्पेन, कोलम्बिया, अबु-धाबी, कतर इत्येतान् देशान्

समेत्य पञ्चाशदधिक-देशा: भागं भजन्ति। मेलके प्राय: द्विसहस्र-प्रकाशका: एकसहस्र-वक्तार: च भागं गृह्णन्ति।

**<u>प्रधानमन्त्री-भारतीय तटरक्षक:</u>**

प्रधानमन्त्री नरेन्द्र-मोदी अद्य भारतीय-तटरक्षक-बलस्य स्थापना-दिवसस्यावसरे तटरक्षक-बलस्य वीरताया: समर्पणस्य निरंतरं सतर्कतायाश्च प्रशंसामकरोत्। एकस्मिन् जनसम्पर्क-पटले श्रीमोदी उक्तवान् यत् सामुद्रिकसुरक्षात: आपत्-प्रतिक्रियां यावत् पर्यावरण-संरक्षणे च भारतीय: तटरक्षक: देशस्य समुद्रस्य अजेय: संरक्षकोऽस्ति य: जलस्य जनस्य च सुरक्षाया: सुनिश्चयं करोति।

**<u>इस्राइल-हमास:</u>**

इस्राइल-हमासयो: गजा-युद्धविरामस्यावसरे अद्य चतुर्थं वारं बद्धानां विपरिणाम: भवति। हमासस्य पक्षत: त्रयाणां इस्राइलस्य बद्धानां विमोचनं भविष्यति। अपि च इस्राइल: अशीत्यधिकैकशत-निगृहीतान् विमोक्ष्यति।

**<u>हॉकी</u>**

हॉकी इण्डिया लीग इति स्पर्धाया: अन्त्यचक्रे अद्य हैदराबाद तूफान्स इत्येतत् दलं श्राची राढ़ बंगाल टाइगर्स दलं सम्मुखी करिष्यति।

**<u>तेजस शिरसे</u>**

भारतस्य तेजस-शिरसे हय: फ्रांसे यूरोपियन आउटडोर-चैंपियनशिप इति स्पर्धाशृङ्खलायां पुरुषाणां षष्टि-मीटर-परिमिते अवरुद्ध-धावने अर्थात् हर्डल्स् इति स्पर्धायां रजतं पदकं अधिगतवान्। स: षड्-चतुर् दशांशोत्तर सप्त क्षणेन सह नवीनं राष्ट्रियं अभिलेखं रचितवान्।

**<u>संस्कृत-साप्ताहिकी</u>**

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्०एम्०गोल्ड्०-प्रवाहिकात: श्व: मध्याह्ने सार्धैक-वादनत: भविष्यति। कृपया श्रृण्वन्तु।

**।। इति वार्ता:।।**